# Kartavirya Arjuna Mantrah 2

# કાર્તવીર્યાર્જુનમન્ત્રઃ ૨

## Document Information

Text title : Kartavirya Arjuna Mantrah 2

File name : kArtavIryArjunamantraH2.itx

Category : deities_misc, mantra

Location : doc_deities_misc

Proofread by : Manish Gavkar

Description/comments : Thanjavur Sarasvati Mahal Series No. 568 kArtavIryArjuna-upAsanA paddhatiH

Latest update : October 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 28, 2025

*sanskritdocuments.org*

# Kartavirya Arjuna Mantrah 2

# કાર્તવીર્યાર્જુનમન્ત્રઃ ૨

અસ્ય શ્રીકાર્તવીર્યાર્જુન મહામન્ત્રસ્ય ।
દત્તાત્રેય ઋષિઃ (શિરસિ)।
અનુષ્ટુપ્છન્દઃ । (વદને)
કાર્તવીર્યાર્જુનો દેવતા (હૃદયે)।
ક્રૌં બીજં (લિઙ્ગે)
ક્લીં શક્તિઃ (વૃષણયોઃ)
અભીષ્ટાર્થજપે વિનિયોગઃ (પાદયોઃ)।
મૂલેન વ્યાપકમ્ ।
ૐ ફ્રોં ગ્રીં અઙ્ગુષ્ટાભ્યાં નમઃ ।
ૐ ક્લીં બ્લૂં તર્જનીભ્યાં નમઃ ।
ૐ આં હ્રીં મધ્યમાભ્યાં નમઃ ।
ૐ ક્રીં શ્રીં અનામિકાભ્યાં નમઃ ।
ૐ હું ફટ્ કનિષ્ટિકાભ્યાં નમઃ ।
સ્વાહા કરતલપૃષ્ટાભ્યાં નમઃ ।
એવં હૃદયાદિ ન્યાસઃ ।
કાર્ત્તવીર્યાર્જુનાય નમ ઇતિ વ્યાપકમ્ ।
ૐ ફ્રૌં ૐ હૃદયાય નમઃ ।
ૐ ગ્રીં ૐ (ઊરુભ્યામ્)।
ૐ ક્લીં ૐ (નાશ્યાં )।
ૐ બ્લૃં ૐ (જાનુભ્યાં )।
ૐ આં ૐ (ગુહ્યે)।
ૐ દ્રીં ૐ (દક્ષિણોરુભ્યામ્)।
ૐ ફ્રોં ૐ (વામોરુભ્યામ્)।
ૐ શ્રીં ૐ (દક્ષિણજાનૌ )।
ૐ હું ૐ (વામાજાનૌ ।

ૐ ફટ્ ૐ (પાદયોઃ)।
ૐ કાં ૐ (શિરઃ)।
ૐ ર્ત્તાં ૐ (દક્ષિણભ્રૂમધ્યે )।
ૐ વીં ૐ (વામભ્રૂમધ્યે )।
ૐ ર્થાં ૐ (કર્ણયૌઃ )।
ૐ ર્જું ૐ (અક્ષણોઃ)।
ૐ નાં ૐ (નાસિકાયામ્)।
ૐ યં ૐ (મુખે)।
ૐ નેં ૐ (કણ્ઠે)।
ૐ મં ૐ (દક્ષિણબાહૌ )।
સર્વમન્ત્રેણાસ્ત્રેણ વ્યાપકમ્ । (સ્વાત્મૈક્યેન ધ્યાયેત્)।
અવ્યાત્સર્વભયાત્પ્રભાકરનિભઃ પ્રદ્યોતનોદ્યોતિતઃ ।
સ્વર્ણસ્રગોપરિ વીતકન્ધરધરો રક્તાંશુકોષ્ણીષવાન્ ।
નાનાકલ્પવિભૂષિતઃ કરસહસ્રાર્ધાત્તબાણાસનો
બાણાર્ધાત્તસહસ્રબાહુરનિશં ભ્રૂવલ્લભો નઃ પ્રભુઃ ॥

સપ્તદ્વીપૈકનાથસ્સવિતૃસમરુચિઃ સર્વદુષ્ટાન્તકો નઃ
પાયાદબ્જાયતાક્ષો રથવરનિલયશ્શૂલકાયોઽતિભીમઃ ।
ચાપાન્તેષુ ત્રિલોકીકરધૃતધનુષો નિસ્સ્વનૈસ્ત્રાસમાનઃ
સ શ્રીમાન્કાર્ત્તવીર્યો નિખિલનૃપનતાઙ્-ઘ્રમ્મ્બુજક્ષિપ્રકારી ॥

ઇતિ ધ્યાત્વા જપેત્ ।

અથમાલામન્ત્રઃ ॥

અસ્ય શ્રી કાર્તવીર્યાર્જુનમહામન્ત્રસ્ય ।
દત્તાત્રેય ઋષિઃ । ગાયત્રી છન્દઃ ।
શ્રીકાર્તવીર્યાર્જુનો દેવતા ।
ઇષ્ટસિદ્ધ્યૈ જપે વિનિયોગઃ ।
દત્તાત્રેયપ્રિયતમાય હૃદયાય નમઃ ।
માહિષ્મતીનાથાય શિરસે સ્વાહા ।
રેવાજલક્રીડાસક્તાય શિખાયૈ વષટ્ ।
હૈહયાધિપતયે કવચાય હુમ્ ।
... નેત્રત્રાયાય વૌષટ્ ।
સહસ્રબાહવે અસ્ત્રાય ફટ્ ।

ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ । દિગ્વિમોકઃ ।

॥ ધ્યાનમ્ ॥

દોર્દણ્ડૈકસહસ્રસમ્મિતકરેષ્વેતેષ્વજસ્રન્દધ-
ત્કોદણ્ડૈસ્સશરૈરુદગ્રવિશિખૈરુદ્યદ્દિવસ્વત્પ્રભુઃ ।
બ્રહ્માણ્ડં પરિપૂરયન્તમખિલં ગણ્ડસ્થલાલોડિનઃ
દ્યોતત્કુણ્ડલમણ્ડિતો વિજયતે શ્રીકાર્તવીર્યઃ પ્રભુઃ ॥ ૧॥

ચક્રેષુખડ્ગમુસલાખ્યકુઠારપાશ
પ્રાસાખ્યચર્મધનુશઙ્ખધરં સ્વહસ્તૈઃ ।
દક્ષોત્તરૈઃ પ્રતિશતૈરરુણામ્બરાઢ્યં
મધ્યન્દિનાર્કસદૃશં સ્મરતાતિઘોરમ્ ॥ ૨॥

રક્તામ્બરાખ્યમતિભીષણમેકનાથં
નીલામ્બુમ્બુદાભગજપૃષ્ટગતં ત્વદન્યૈઃ ।
સંવેષ્ટિતં સકલદુઃખહરં વિશિષ્ટં
શિષ્ટેષ્ટદં સકલદુઃખનિવારણાય ॥ ૩॥

ૐ નમો ભગવતે કાર્તવીર્યાર્જુન,
સહસ્રકરસદૃશ સર્વદુષ્ટાન્તક,
સર્વતોરુદધેરાગન્તુકાનસ્મદ્ગસુવિલુમ્પકાન્ ચોરસમૂહાન્
વક્ત્રસહસ્રૈર્નિવારય નિવારય, રુન્ધય રુન્ધય
સ્વપાશસહસ્રૈર્બન્ધય બન્ધય, અઙ્કુશસહસ્રૈરાકુઞ્ચય
આકુઞ્જય, ચાપોદ્ધતબાણસહસ્રૈર્ભિન્ધિ ભિન્ધિ
સ્વહસ્તોદ્ધતખડ્ગસહસ્રૈશ્છિન્ધિ શ્છિન્ધિ સ્વહસ્તોદ્ધતમુસલ
સહસ્રૈર્મર્દય મર્દય સ્વશઙ્ખોદ્ધતનાદસહસ્રૈર્ભીષય ભીષય
સ્વહસ્તોદ્ધતચક્રસહસ્રર્નિકૃન્તય નિકૃન્તય ત્રાસય ત્રાસય
વિદારય વિદારય સ્તમ્ભય સ્તમ્ભય મારય મારય ॥

વશીકુરુ વશીકુરુ, ઉચ્ચાટયોચ્ચાટય, ભઞ્જય ભઞ્જય,
દત્તાત્રેયશ્રીપાદપ્રિયતમ, શ્રીકાર્તવીર્યાર્જુન,
સર્વતોરુદધેરાગન્તુકાનસ્મદ્ગસુવિલુમ્પકાન્
ચોરસમૂહાન્સમ્યગુન્મૂલયોન્મૂલય ॥

ધ્યાનમ્ । પઞ્ચપૂજા પૂર્વોક્તરીત્યા હૃદયાદિન્યાસઃ

જપસમર્પણમ્ ।

ઇતિ કાર્તવીર્યાર્જુનમન્ત્રઃ ૨ સમ્પૂર્ણઃ ।

Proofread by Manish Gavkar

*Kartavirya Arjuna Mantrah 2*
pdf was typeset on October 28, 2025

Please send corrections to *sanskrit@cheerful.com*